shrIrAmasahasranAmam shrImadAnandarAmAyaNe

# શ્રીરામસહસ્રનામમ્ શ્રીમદાનન્દરામાયણે

## Document Information

Text title : shrIrAmasahasranAmastotra 1 shrImadAnandarAmAyaNe

File name : rama1000Ananda.itx

Category : sahasranAma, raama, vAlmIki

Location : doc_raama

Author : Valmiki

Transliterated by : PSA Easwaran psaeaswaran at gmail

Proofread by : PSA Easwaran psaeaswaran at gmail

Description/comments : shrImadAnandarAmAyaNe rAjyakANDe pUrvArdhe prathamaH sargaH

Latest update : September 6, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 30, 2021

*sanskritdocuments.org*

# શ્રીરામસહસ્રનામમ્ શ્રીમદાનન્દરામાયણે

શ્રીપાર્વત્યુવાચ
શ્રોતુમિચ્છામિ દેવેશ તદહં સર્વકામદમ્ ।
નામ્નાં સહસ્રં માં બ્રૂહિ યદસ્તિ મયિ તે દયા ॥ ૨૮॥

શ્રીમહાદેવ ઉવાચ
અથ વક્ષ્યામિ ભો દેવિ રામનામસહસ્રકમ્ ।
શ‍ૃણુષ્વૈકમનાઃ સ્તોત્રં ગુહ્યાદ્ગુહ્યતરં મહત્ ॥ ૨૯॥

ઋષિર્વિનાયકશ્ચાસ્ય હ્યનુષ્ટુપ્ છન્દ ઉચ્યતે ।
પરબ્રહ્માત્મકો રામો દેવતા શુભદર્શને ॥ ૩૦॥

ૐ અસ્ય શ્રીરામસહસ્રનામમાલામન્ત્રસ્ય વિનાયક ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીરામો દેવતા ।
મહાવિષ્ણુરિતિ બીજમ્ । ગુણભૃન્નિર્ગુણો મહાનિતિ શક્તિઃ ।
સચ્ચિદાનન્દવિગ્રહ ઇતિ કીલકમ્ ।
શ્રીરામપ્રીત્યર્થે જપે વિનિયોગઃ ॥

અઙ્ગુલિન્યાસઃ
ૐ શ્રીરામચન્દ્રાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
સીતાપતયે તર્જનીભ્યાં નમઃ ।
રઘુનાથાય મધ્યમાભ્યાં નમઃ ।
ભરતાગ્રજાય અનામિકાભ્યાં નમઃ ।
દશરથાત્મજાય કનિષ્ઠિકાભ્યાં નમઃ ।
હનુમત્પ્રભવે કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિન્યાસઃ
ૐ શ્રીરામચન્દ્રાય હૃદયાય નમઃ ।
સીતાપતયે શિરસે સ્વાહા ।
રઘુનાથાય શિખાયૈ વષટ્ ।

ભરતાગ્રજાય કવચાય હુમ્ ।
દશરથાત્મજાય નેત્રત્રયાય વૌષટ્ ।
હનુમત્પ્રભવે અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્ ।
ધ્યાયેદાજાનુબાહું ધૃતશરધનુષં બદ્ધપદ્માસનસ્થં
પીતં વાસો વસાનં નવકમલસ્પર્ધિ નેત્રં પ્રસન્નમ્ ।
વામાઙ્કારૂઢસીતામુખકમલમિલલ્લોચનં નીરદાભં
નાનાલઙ્કારદીપ્તં દધતમુરુજટામણ્ડલં રામચન્દ્રમ્ ॥ ૩૧॥

વૈદેહીસહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
મધ્યે પુષ્પકમાસને મણિમયે વીરાસને સંસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનેસુતે તત્ત્વં મુનિભ્યઃ પરં
વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૩૨॥

સૌવર્ણમણ્ડપે દિવ્યે પુષ્પકે સુવિરાજિતે ।
મૂલે કલ્પતરોઃ સ્વર્ણપીઠે સિંહાષ્ટસંયુતે ॥ ૩૩॥

મૃદુશ્લક્ષ્ણતરે તત્ર જાનક્યા સહ સંસ્થિતમ્ ।
રામં નીલોત્પલશ્યામં દ્વિભુજં પીતવાસસમ્ ॥ ૩૪॥

સ્મિતવક્ત્રં સુખાસીનં પદ્મપત્રનિભેક્ષણમ્ ।
કિરીટહારકેયૂરકુણ્ડલૈઃ કટકાદિભિઃ ॥ ૩૫॥

ભ્રાજમાનં જ્ઞાનમુદ્રાધરં વીરાસનસ્થિતમ્ ।
સ્પૃશન્તં સ્તનયોરગ્રે જાનક્યાઃ સવ્યપાણિના ॥ ૩૬॥

વસિષ્ઠવામદેવાદ્યૈઃ સેવિતં લક્ષ્મણાદિભિઃ ।
અયોધ્યાનગરે રમ્યે હ્યભિષિક્તં રઘૂદ્વહમ્ ॥ ૩૭॥

એવં ધ્યાત્વા જપેન્નિત્યં રામનામસહસ્રકમ્ ।
હત્યાકોટિયુતો વાપિ મુચ્યતે નાત્ર સંશયઃ ॥ ૩૮॥

(અથ સહસ્રનામસ્તોત્રપ્રારમ્ભઃ ।)
ૐ રામઃ શ્રીમાન્મહાવિષ્ણુર્જિષ્ણુર્દેવહિતાવહઃ ।
તત્ત્વાત્મા તારકબ્રહ્મ શાશ્વતઃ સર્વસિદ્ધિદઃ ॥ ૩૯॥

રાજીવલોચનઃ શ્રીમાન્ શ્રીરામો રઘુપુઙ્ગવઃ ।
રામભદ્રઃ સદાચારો રાજેન્દ્રો જાનકીપતિઃ ॥ ૪૦॥

અગ્રગણ્યો વરેણ્યશ્ચ વરદઃ પરમેશ્વરઃ ।
જનાર્દનો જિતામિત્રઃ પરાર્થૈકપ્રયોજનઃ ॥ ૪૧॥

વિશ્વામિત્રપ્રિયો દાતા શત્રુજિચ્છત્રુતાપનઃ ।
સર્વજ્ઞઃ સર્વવેદાદિઃ શરણ્યો વાલિમર્દનઃ ॥ ૪૨॥

જ્ઞાનભવ્યોઽપરિચ્છેદ્યો વાગ્મી સત્યવ્રતઃ શુચિઃ ।
જ્ઞાનગમ્યો દૃઢપ્રજ્ઞઃ ખરધ્વંસઃ પ્રતાપવાન્ ॥ ૪૩॥

દ્યુતિમાનાત્મવાન્ વીરો જિતક્રોધોઽરિમર્દનઃ ।
વિશ્વરૂપો વિશાલાક્ષઃ પ્રભુઃ પરિવૃઢો દૃઢઃ ॥ ૪૪॥

ઈશઃ ખડ્ગધરઃ શ્રીમાન્ કૌસલ્યેયોઽનસૂયકઃ ।
વિપુલાંસો મહોરસ્કઃ પરમેષ્ઠી પરાયણઃ ॥ ૪૫॥

સત્યવ્રતઃ સત્યસન્ધો ગુરુઃ પરમધાર્મિકઃ ।
લોકેશો લોકવન્દ્યશ્ચ લોકાત્મા લોકકૃદ્વિભુઃ ॥ ૪૬॥

અનાદિર્ભગવાન્ સેવ્યો જિતમાયો રઘૂદ્વહઃ ।
રામો દયાકરો દક્ષઃ સર્વજ્ઞઃ સર્વપાવનઃ ॥ ૪૭॥

બ્રહ્મણ્યો નીતિમાન્ ગોપ્તા સર્વદેવમયો હરિઃ ।
સુન્દરઃ પીતવાસાશ્ચ સૂત્રકારઃ પુરાતનઃ ॥ ૪૮॥

સૌમ્યો મહર્ષિઃ કોદણ્ડઃ સર્વજ્ઞઃ સર્વકોવિદઃ ।
કવિઃ સુગ્રીવવરદઃ સર્વપુણ્યાધિકપ્રદઃ ॥ ૪૯॥

ભવ્યો જિતારિષડ્વર્ગો મહોદારોઽઘનાશનઃ ।
સુકીર્તિરાદિપુરુષઃ કાન્તઃ પુણ્યકૃતાગમઃ ॥ ૫૦॥

અકલ્મષશ્ચતુર્બાહુઃ સર્વાવાસો દુરાસદઃ । 100
સ્મિતભાષી નિવૃત્તાત્મા સ્મૃતિમાન્ વીર્યવાન્ પ્રભુઃ ॥ ૫૧॥

ધીરો દાન્તો ઘનશ્યામઃ સર્વાયુધવિશારદઃ ।
અધ્યાત્મયોગનિલયઃ સુમના લક્ષ્મણાગ્રજઃ ॥ ૫૨॥

સર્વતીર્થમયઃ શૂરઃ સર્વયજ્ઞફલપ્રદઃ ।
યજ્ઞસ્વરૂપો યજ્ઞેશો જરામરણવર્જિતઃ ॥ ૫૩॥

વર્ણાશ્રમગુરુર્વર્ણી શત્રુજિત્પુરુષોત્તમઃ ।

શિવલિઙ્ગપ્રતિષ્ઠાતા પરમાત્મા પરાપરઃ ॥ ૫૪॥

પ્રમાણભૂતો દુર્જ્ઞેયઃ પૂર્ણઃ પરપુરઞ્જયઃ ।
અનન્તદૃષ્ટિરાનન્દો ધનુર્વેદો ધનુર્ધરઃ ॥ ૫૫॥

ગુણાકારો ગુણશ્રેષ્ઠઃ સચ્ચિદાનન્દવિગ્રહઃ ।
અભિવાદ્યો મહાકાયો વિશ્વકર્મા વિશારદઃ ॥ ૫૬॥

વિનીતાત્મા વીતરાગસ્તપસ્વીશો જનેશ્વરઃ ।
કલ્યાણઃ પ્રહ્વતિઃ કલ્પઃ સર્વેશઃ સર્વકામદઃ ॥ ૫૭॥

અક્ષયઃ પુરુષઃ સાક્ષી કેશવઃ પુરુષોત્તમઃ ।
લોકાધ્યક્ષો મહાકાર્યો વિભીષણવરપ્રદઃ ॥ ૫૮॥

આનન્દવિગ્રહો જ્યોતિર્હનુમત્પ્રભુરવ્યયઃ ।
ભ્રાજિષ્ણુઃ સહનો ભોક્તા સત્યવાદી બહુશ્રુતઃ ॥ ૫૯॥

સુખદઃ કારણં કર્તા ભવબન્ધવિમોચનઃ ।
દેવચૂડામણિર્નેતા બ્રહ્મણ્યો બ્રહ્મવર્ધનઃ ॥ ૬૦॥

સંસારતારકો રામઃ સર્વદુઃખવિમોક્ષકૃત્ ।
વિદ્વત્તમો વિશ્વકર્તા વિશ્વકૃદ્વિશ્વકર્મ ચ ॥ ૬૧॥

નિત્યો નિયતકલ્યાણઃ સીતાશોકવિનાશકૃત્ ।
કાકુત્સ્થઃ પુણ્ડરીકાક્ષો વિશ્વામિત્રભયાપહઃ ॥ ૬૨॥

મારીચમથનો રામો વિરાધવધપણ્ડિતઃ ।
દુઃસ્વપ્નનાશનો રમ્યઃ કિરીટી ત્રિદશાધિપઃ ॥ ૬૩॥

મહાધનુર્મહાકાયો ભીમો ભીમપરાક્રમઃ ।
તત્ત્વસ્વરૂપસ્તત્ત્વજ્ઞસ્તત્ત્વવાદી સુવિક્રમઃ ॥ ૬૪॥

ભૂતાત્મ ભૂતકૃત્સ્વામી કાલજ્ઞાની મહાવપુઃ ।
અનિર્વિણ્ણો ગુણગ્રામો નિષ્કલઙ્કઃ કલઙ્કહા ॥ ૬૫॥

સ્વભાવભદ્રઃ શત્રુઘ્નઃ કેશવઃ સ્થાણુરીશ્વરઃ ।
ભૂતાદિઃ શંભુરાદિત્યઃ સ્થવિષ્ઠઃ શાશ્વતો ધ્રુવઃ ॥ ૬૬॥

કવચી કુણ્ડલી ચક્રી ખડ્ગી ભક્તજનપ્રિયઃ ।
અમૃત્યુર્જન્મરહિતઃ સર્વજિત્સર્વગોચરઃ ॥ ૬૭॥

અનુત્તમોઽપ્રમેયાત્મા સર્વાત્મા ગુણસાગરઃ । 200
રામઃ સમાત્મા સમગો જટામુકુટમણ્ડિતઃ ॥ ૬૮॥

અજેયઃ સર્વભૂતાત્મા વિષ્વક્સેનો મહાતપાઃ ।
લોકાધ્યક્ષો મહાબાહુરમૃતો વેદવિત્તમઃ ॥ ૬૯॥

સહિષ્ણુઃ સદ્ગતિઃ શાસ્તા વિશ્વયોનિર્મહાદ્યુતિઃ ।
અતીન્દ્ર ઊર્જિતઃ પ્રાંશુરુપેન્દ્રો વામનો બલિઃ ॥ ૭૦॥

ધનુર્વેદો વિધાતા ચ બ્રહ્મા વિષ્ણુશ્ચ શઙ્કરઃ ।
હંસો મરીચિર્ગોવિન્દો રત્નગર્ભો મહદ્દ્યુતિઃ ॥ ૭૧॥ var મહાદ્યુતિઃ

વ્યાસો વાચસ્પતિઃ સર્વદર્પિતાસુરમર્દનઃ ।
જાનકીવલ્લભઃ શ્રીમાન્ પ્રકટઃ પ્રીતિવર્ધનઃ ॥ ૭૨॥

સંભવોઽતીન્દ્રિયો વેદ્યો નિર્દેશો જામ્બવત્પ્રભુઃ ।
મદનો મન્મથો વ્યાપી વિશ્વરૂપો નિરઞ્જનઃ ॥ ૭૩॥

નારાયણોઽગ્રણી સાધુર્જટાયુપ્રીતિવર્ધનઃ ।
નૈકરૂપો જગન્નાથઃ સુરકાર્યહિતઃ પ્રભુઃ ॥ ૭૪॥

જિતક્રોધો જિતારાતિઃ પ્લવગાધિપરાજ્યદઃ ।
વસુદઃ સુભુજો નૈકમાયો ભવ્યઃ પ્રમોદનઃ ॥ ૭૫॥

ચણ્ડાંશુઃ સિદ્ધિદઃ કલ્પઃ શરણાગતવત્સલઃ ।
અગદો રોગહર્તા ચ મન્ત્રજ્ઞો મન્ત્રભાવનઃ ॥ ૭૬॥

સૌમિત્રિવત્સલો ધુર્યો વ્યક્તાવ્યક્તસ્વરૂપધૃક્ ।
વસિષ્ઠો ગ્રામણીઃ શ્રીમાનનુકૂલઃ પ્રિયંવદઃ ॥ ૭૭॥

અતુલઃ સાત્ત્વિકો ધીરઃ શરાસનવિશારદઃ ।
જ્યેષ્ઠઃ સર્વગુણોપેતઃ શક્તિમાંસ્તાટકાન્તકઃ ॥ ૭૮॥

વૈકુણ્ઠઃ પ્રાણિનાં પ્રાણઃ કમલઃ કમલાધિપઃ ।
ગોવર્ધનધરો મત્સ્યરૂપઃ કારુણ્યસાગરઃ ॥ ૭૯॥

કુમ્ભકર્ણપ્રભેત્તા ચ ગોપિગોપાલસંવૃતઃ । 300
માયાવી વ્યાપકો વ્યાપી રેણુકેયબલાપહઃ ॥ ૮૦॥

પિનાકમથનો વન્દ્યઃ સમર્થો ગરુડધ્વજઃ ।
લોકત્રયાશ્રયો લોકભરિતો ભરતાગ્રજઃ ॥ ૮૧॥

શ્રીધરઃ સદ્ગતિર્લોકસાક્ષી નારાયણો વિભુઃ ।
મનોરૂપી મનોવેગી પૂર્ણઃ પુરુષપુઙ્ગવઃ ॥ ૮૨॥

યદુશ્રેષ્ઠો યદુપતિર્ભૂતાવાસઃ સુવિક્રમઃ ।
તેજોધરો ધરાધરશ્ચતુર્મૂર્તિર્મહાનિધિઃ ॥ ૮૩॥

ચાણૂરમથનો વન્દ્યઃ શાન્તો ભરતવન્દિતઃ ।
શબ્દાતિગો ગભીરાત્મા કોમલાઙ્ગઃ પ્રજાગરઃ ॥ ૮૪॥

લોકોર્ધ્વગઃ શેષશાયી ક્ષીરાબ્ધિનિલયોઽમલઃ ।
આત્મજ્યોતિરદીનાત્મા સહસ્રાર્ચિઃ સહસ્રપાત્ ॥ ૮૫॥

અમૃતાંશુર્મહીગર્તો નિવૃત્તવિષયસ્પૃહઃ ।
ત્રિકાલજ્ઞો મુનિઃ સાક્ષી વિહાયસગતિઃ કૃતી ॥ ૮૬॥

પર્જન્યઃ કુમુદો ભૂતાવાસઃ કમલલોચનઃ ।
શ્રીવત્સવક્ષાઃ શ્રીવાસો વીરહા લક્ષ્મણાગ્રજઃ ॥ ૮૭॥

લોકાભિરામો લોકારિમર્દનઃ સેવકપ્રિયઃ ।
સનાતનતમો મેઘશ્યામલો રાક્ષસાન્તકઃ ॥ ૮૮॥

દિવ્યાયુધધરઃ શ્રીમાનપ્રમેયો જિતેન્દ્રિયઃ ।
ભૂદેવવન્દ્યો જનકપ્રિયકૃત્પ્રપિતામહઃ ॥ ૮૯॥

ઉત્તમઃ સાત્વિકઃ સત્યઃ સત્યસન્ધસ્ત્રિવિક્રમઃ ।
સુવૃત્તઃ સુગમઃ સૂક્ષ્મઃ સુઘોષઃ સુખદઃ સુહૃત્ ॥ ૯૦॥

દામોદરોઽચ્યુતઃ શાર્ઙ્ગી વામનો મથુરાધિપઃ ।
દેવકીનન્દનઃ શૌરિઃ શૂરઃ કૈટભમર્દનઃ ॥ ૯૧॥

સપ્તતાલપ્રભેત્તા ચ મિત્રવંશપ્રવર્ધનઃ ।
કાલસ્વરૂપી કાલાત્મા કાલઃ કલ્યાણદઃ કલિઃ ॥ ૯૨॥ 400

સંવત્સરો ઋતુઃ પક્ષો હ્યયનં દિવસો યુગઃ ।
સ્તવ્યો વિવિક્તો નિર્લેપઃ સર્વવ્યાપી નિરાકુલઃ ॥ ૯૩॥

અનાદિનિધનઃ સર્વલોકપૂજ્યો નિરામયઃ ।
રસો રસજ્ઞઃ સારજ્ઞો લોકસારો રસાત્મકઃ ॥ ૯૪॥

સર્વદુઃખાતિગો વિદ્યારાશિઃ પરમગોચરઃ ।

શેષો વિશેષો વિગતકલ્મષો રઘુપુઙ્ગવઃ ॥ ૯૫॥

વર્ણશ્રેષ્ઠો વર્ણભાવ્યો વર્ણો વર્ણગુણોજ્જ્વલઃ ।
કર્મસાક્ષી ગુણશ્રેષ્ઠો દેવઃ સુરવરપ્રદઃ ॥ ૯૬॥

દેવાધિદેવો દેવર્ષિર્દેવાસુરનમસ્કૃતઃ ।
સર્વદેવમયશ્ચક્રી શાર્ઙ્ગપાણી રઘૂત્તમઃ ॥ ૯૭॥

મનોગુપ્તિરહઙ્કારઃ પ્રકૃતિઃ પુરુષોઽવ્યયઃ ।
ન્યાયો ન્યાયી નયી શ્રીમાન્ નયો નગધરો ધ્રુવઃ ॥ ૯૮॥

લક્ષ્મીવિશ્વમ્ભરો ભર્તા દેવેન્દ્રો બલિમર્દનઃ ।
બાણારિમર્દનો યજ્વાનુત્તમો મુનિસેવિતઃ ॥ ૯૯॥

દેવાગ્રણીઃ શિવધ્યાનતત્પરઃ પરમઃ પરઃ ।
સામગેયઃ પ્રિયઃ શૂરઃ પૂર્ણકીર્તિઃ સુલોચનઃ ॥ ૧૦૦॥

અવ્યક્તલક્ષણો વ્યક્તો દશાસ્યદ્વિપકેસરી ।
કલાનિધિઃ કલાનાથઃ કમલાનન્દવર્ધનઃ ॥ ૧૦૧॥

પુણ્યઃ પુણ્યાધિકઃ પૂર્ણઃ પૂર્વઃ પૂરયિતા રવિઃ ।
જટિલઃ કલ્મષધ્વાન્તપ્રભઞ્જનવિભાવસુઃ ॥ ૧૦૨॥

જયી જિતારિઃ સર્વાદિઃ શમનો ભવભઞ્જનઃ ।
અલઙ્કરિષ્ણુરચલો રોચિષ્ણુર્વિક્રમોત્તમઃ ॥ ૧૦૩॥

આશુઃ શબ્દપતિઃ શબ્દગોચરો રઞ્જનો લઘુઃ ।
નિઃશબ્દપુરુષો માયો સ્થૂલઃ સૂક્ષ્મો વિલક્ષણઃ ॥ ૧૦૪॥ 500

આત્મયોનિરયોનિશ્ચ સપ્તજિહ્વઃ સહસ્રપાત્ ।
સનાતનતમઃ સ્રગ્વી પેશલો વિજિતાંબરઃ ॥ ૧૦૫॥

શક્તિમાન્ શઙ્ખભૃન્નાથો ગદાધરરથાઙ્ગભૃત્ ।
નિરીહો નિર્વિકલ્પશ્ચ ચિદ્રૂપો વીતસાધ્વસઃ ॥ ૧૦૬॥

સનાતનઃ સહસ્રાક્ષઃ શતમૂર્તિર્ઘનપ્રભઃ ।
હૃત્પુણ્ડરીકશયનઃ કઠિનો દ્રવ એવ ચ ॥ ૧૦૭॥

સૂર્યો ગ્રહપતિઃ શ્રીમાન્ સમર્થોઽનર્થનાશનઃ ।
અધર્મશત્રૂ રક્ષોઘ્નઃ પુરુહૂતઃ પુરસ્તુતઃ ॥ ૧૦૮॥

બ્રહ્મગર્ભો બૃહદ્ગર્ભો ધર્મધેનુર્ધનાગમઃ ।
હિરણ્યગર્ભો જ્યોતિષ્માન્ સુલલાટઃ સુવિક્રમઃ ॥ ૧૦૯॥

શિવપૂજારતઃ શ્રીમાન્ ભવાનીપ્રિયકૃદ્વશી ।
નરો નારાયણઃ શ્યામઃ કપર્દી નીલલોહિતઃ ॥ ૧૧૦॥

રુદ્રઃ પશુપતિઃ સ્થાણુર્વિશ્વામિત્રો દ્વિજેશ્વરઃ ।
માતામહો માતરિશ્વા વિરિઞ્ચિર્વિષ્ટરશ્રવાઃ ॥ ૧૧૧॥

અક્ષોભ્યઃ સર્વભૂતાનાં ચણ્ડઃ સત્યપરાક્રમઃ ।
વાલખિલ્યો મહાકલ્પઃ કલ્પવૃક્ષઃ કલાધરઃ ॥ ૧૧૨॥

નિદાઘસ્તપનો મેઘઃ શુક્રઃ પરબલાપહૃત્ ।
વસુશ્રવાઃ કવ્યવાહઃ પ્રતપ્તો વિશ્વભોજનઃ ॥ ૧૧૩॥

રામો નીલોત્પલશ્યામો જ્ઞાનસ્કન્દો મહાદ્યુતિઃ ।
કબન્ધમથનો દિવ્યઃ કમ્બુગ્રીવઃ શિવપ્રિયઃ ॥ ૧૧૪॥

સુખી નીલઃ સુનિષ્પન્નઃ સુલભઃ શિશિરાત્મકઃ ।
અસંસૃષ્ટોઽતિથિઃ શૂરઃ પ્રમાથી પાપનાશકૃત્ ॥ ૧૧૫॥

પવિત્રપાદઃ પાપારિર્મણિપૂરો નભોગતિઃ ।
ઉત્તારણો દુષ્કૃતિહા દુર્ધર્ષો દુઃસહો બલઃ ॥ ૧૧૬॥ 600

અમૃતેશોઽમૃતવપુર્ધર્મી ધર્મઃ કૃપાકરઃ ।
ભગો વિવસ્વાનાદિત્યો યોગાચાર્યો દિવસ્પતિઃ ॥ ૧૧૭॥

ઉદારકીર્તિરુદ્યોગી વાઙ્મયઃ સદસન્મયઃ ।
નક્ષત્રમાની નાકેશઃ સ્વાધિષ્ઠાનઃ ષડાશ્રયઃ ॥ ૧૧૮॥

ચતુર્વર્ગફલં વર્ણશક્તિત્રયફલં નિધિઃ ।
નિધાનગર્ભો નિર્વ્યાજો નિરીશો વ્યાલમર્દનઃ ॥ ૧૧૯॥

શ્રીવલ્લભઃ શિવારંભઃ શાન્તો ભદ્રઃ સમઞ્જયઃ ।
ભૂશાયી ભૂતકૃદ્ભૂતિર્ભૂષણો ભૂતભાવનઃ ॥ ૧૨૦॥

અકાયો ભક્તકાયસ્થઃ કાલજ્ઞાની મહાપટુઃ ।
પરાર્ધવૃત્તિરચલો વિવિક્તઃ શ્રુતિસાગરઃ ॥ ૧૨૧॥

સ્વભાવભદ્રો મધ્યસ્થઃ સંસારભયનાશનઃ ।
વેદ્યો વૈદ્યો વિયદ્ગોપ્તા સર્વામરમુનીશ્વરઃ ॥ ૧૨૨॥

સુરેન્દ્રઃ કારણં કર્મકરઃ કર્મી હ્યધોક્ષજઃ ।
ધૈર્યોઽગ્રધુર્યો ધાત્રીશઃ સઙ્કલ્પઃ શર્વરીપતિઃ ॥ ૧૨૩॥

પરમાર્થગુરુર્દૃષ્ટિઃ સુચિરાશ્રિતવત્સલઃ ।
વિષ્ણુર્જિષ્ણુર્વિભુર્યજ્ઞો યજ્ઞેશો યજ્ઞપાલકઃ ॥ ૧૨૪॥

પ્રભુર્વિષ્ણુર્ગ્રસિષ્ણુશ્ચ લોકાત્મા લોકપાલકઃ ।
કેશવઃ કેશિહા કાવ્યઃ કવિઃ કારણકારણમ્ ॥ ૧૨૫॥

કાલકર્તા કાલશેષો વાસુદેવઃ પુરુષ્ટુતઃ ।
આદિકર્તા વરાહશ્ચ વામનો મધુસૂદનઃ ॥ ૧૨૬॥

નારાયણો નરો હંસો વિષ્વક્સેનો જનાર્દનઃ ।
વિશ્વકર્તા મહાયજ્ઞો જ્યોતિષ્માન્પુરુષોત્તમઃ ॥ ૧૨૭॥ 700

વૈકુણ્ઠઃ પુણ્ડરીકાક્ષઃ કૃષ્ણઃ સૂર્યઃ સુરાર્ચિતઃ ।
નારસિંહો મહાભીમો વજ્રદંષ્ટ્રો નખાયુધઃ ॥ ૧૨૮॥

આદિદેવો જગત્કર્તા યોગીશો ગરુડધ્વજઃ ।
ગોવિન્દો ગોપતિર્ગોપ્તા ભૂપતિર્ભુવનેશ્વરઃ ॥ ૧૨૯॥

પદ્મનાભો હૃષીકેશો ધાતા દામોદરઃ પ્રભુઃ ।
ત્રિવિક્રમસ્ત્રિલોકેશો બ્રહ્મેશઃ પ્રીતિવર્ધનઃ ॥ ૧૩૦॥

સંન્યાસી શાસ્ત્રતત્ત્વજ્ઞો મન્દિરો ગિરિશો નતઃ ।
વામનો દુષ્ટદમનો ગોવિન્દો ગોપવલ્લભઃ ॥ ૧૩૧॥

ભક્તપ્રિયોઽચ્યુતઃ સત્યઃ સત્યકીર્તિર્ધૃતિઃ સ્મૃતિઃ ।
કારુણ્યઃ કરુણો વ્યાસઃ પાપહા શાન્તિવર્ધનઃ ॥ ૧૩૨॥

બદરીનિલયઃ શાન્તસ્તપસ્વી વૈદ્યુતઃ પ્રભુઃ ।
ભૂતાવાસો મહાવાસો શ્રીનિવાસઃ શ્રિયઃ પતિઃ ॥ ૧૩૩॥

તપોવાસો મુદાવાસઃ સત્યવાસઃ સનાતનઃ ।
પુરુષઃ પુષ્કરઃ પુણ્યઃ પુષ્કરાક્ષો મહેશ્વરઃ ॥ ૧૩૪॥

પૂર્ણમૂર્તિઃ પુરાણજ્ઞઃ પુણ્યદઃ પ્રીતિવર્ધનઃ ।
પૂર્ણરૂપઃ કાલચક્રપ્રવર્તનસમાહિતઃ ॥ ૧૩૫॥

નારાયણઃ પરઞ્જ્યોતિઃ પરમાત્મા સદાશિવઃ ।

શઙ્ખી ચક્રી ગદી શાર્ઙ્ગી લાઙ્ગલી મુસલી હલી ॥ ૧૩૬॥

કિરીટી કુણ્ડલી હારી મેખલી કવચી ધ્વજી ।
યોદ્ધા જેતા મહાવીર્યઃ શત્રુઘ્નઃ શત્રુતાપનઃ ॥ ૧૩૭॥

શાસ્તા શાસ્ત્રકરઃ શાસ્ત્રં શઙ્કરઃ શઙ્કરસ્તુતઃ ।
સારથી સાત્ત્વિકઃ સ્વામી સામવેદપ્રિયઃ સમઃ ॥ ૧૩૮॥ 800

પવનઃ સંહિતઃ શક્તિઃ સમ્પૂર્ણાઙ્ગઃ સમૃદ્ધિમાન્ ।
સ્વર્ગદઃ કામદઃ શ્રીદઃ કીર્તિદઃ કીર્તિદાયકઃ ॥ ૧૩૯॥

મોક્ષદઃ પુણ્ડરીકાક્ષઃ ક્ષીરાબ્ધિકૃતકેતનઃ ।
સર્વાત્મા સર્વલોકેશઃ પ્રેરકઃ પાપનાશનઃ ॥ ૧૪૦॥

વૈકુણ્ઠઃ પુણ્ડરીકાક્ષઃ  સર્વદેવનમસ્કૃતઃ ।
સર્વવ્યાપી જગન્નાથઃ સર્વલોકમહેશ્વરઃ ॥ ૧૪૧॥

સર્ગસ્થિત્યન્તકૃદ્દેવઃ સર્વલોકસુખાવહઃ ।
અક્ષયઃ શાશ્વતોઽનન્તઃ ક્ષયવૃદ્ધિવિવર્જિતઃ ॥ ૧૪૨॥

નિર્લેપો નિર્ગુણઃ સૂક્ષ્મો નિર્વિકારો નિરઞ્જનઃ ।
સર્વોપાધિવિનિર્મુક્તઃ સત્તામાત્રવ્યવસ્થિતઃ ॥ ૧૪૩॥

અધિકારી વિભુર્નિત્યઃ પરમાત્મા સનાતનઃ ।
અચલો નિશ્ચલો વ્યાપી નિત્યતૃપ્તો નિરાશ્રયઃ ॥ ૧૪૪॥

શ્યામી યુવા લોહિતાક્ષો દીપ્ત્યા શોભિતભાષણઃ ।
આજાનુબાહુઃ સુમુખઃ સિંહસ્કન્ધો મહાભુજઃ ॥ ૧૪૫॥

સત્ત્વવાન્ ગુણસમ્પન્નો દીપ્યમાનઃ સ્વતેજસા ।
કાલાત્મા ભગવાન્ કાલઃ કાલચક્રપ્રવર્તકઃ ॥ ૧૪૬॥

નારાયણઃ પરઞ્જ્યોતિઃ પરમાત્મા સનાતનઃ ।
વિશ્વકૃદ્વિશ્વભોક્તા ચ વિશ્વગોપ્તા ચ શાશ્વતઃ ॥ ૧૪૭॥

વિશ્વેશ્વરો વિશ્વમૂર્તિર્વિશ્વાત્મા વિશ્વભાવનઃ ।
સર્વભૂતસુહૃચ્છાન્તઃ સર્વભૂતાનુકમ્પનઃ ॥ ૧૪૮॥

સર્વેશ્વરઃ સર્વશર્વઃ સર્વદાઽઽશ્રિતવત્સલઃ ।
સર્વગઃ સર્વભૂતેશઃ સર્વભૂતાશયસ્થિતઃ ॥ ૧૪૯॥

અભ્યન્તરસ્થસ્તમસશ્છેત્તા નારાયણઃ પરઃ ।
અનાદિનિધનઃ સ્રષ્ટા પ્રજાપતિપતિર્હરિઃ ॥ ૧૫૦॥

નરસિંહો હૃષીકેશઃ સર્વાત્મા સર્વદૃગ્વશી ।
જગતસ્તસ્થુષશ્ચૈવ પ્રભુર્નેતા સનાતનઃ ॥ ૧૫૧॥ 900

કર્તા ધાતા વિધાતા ચ  સર્વેષાં પતિરીશ્વરઃ ।
સહસ્રમૂર્ધા વિશ્વાત્મા વિષ્ણુર્વિશ્વદૃગવ્યયઃ ॥ ૧૫૨॥

પુરાણપુરુષઃ શ્રેષ્ઠઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
તત્ત્વં નારાયણો વિષ્ણુર્વાસુદેવઃ સનાતનઃ ॥ ૧૫૩॥

પરમાત્મા પરંબ્રહ્મ સચ્ચિદાનન્દવિગ્રહઃ ।
પરઞ્જ્યોતિઃ પરન્ધામ પરાકાશઃ પરાત્પરઃ ॥ ૧૫૪॥

અચ્યુતઃ પુરુષઃ કૃષ્ણઃ શાશ્વતઃ શિવ ઈશ્વરઃ ।
નિત્યઃ સર્વગતઃ સ્થાણૂ રુદ્રઃ સાક્ષી પ્રજાપતિઃ ॥ ૧૫૫॥

હિરણ્યગર્ભઃ સવિતા લોકકૃલ્લોકભુગ્વિભુઃ ।
ઓઙ્કારવાચ્યો ભગવાન્ શ્રીભૂલીલાપતિઃ પ્રભુઃ ॥ ૧૫૬॥

સર્વલોકેશ્વરઃ શ્રીમાન્ સર્વજ્ઞઃ સર્વતોમુખઃ ।
સ્વામી સુશીલઃ સુલભઃ સર્વગઃ સર્વશક્તિમાન્ ॥ ૧૫૭॥

નિત્યઃ સમ્પૂર્ણકામશ્ચ નૈસર્ગિકસુહૃત્સુખી ।
કૃપાપીયૂષજલધિઃ શરણ્યઃ સર્વશક્તિમાન્ ॥ ૧૫૮॥

શ્રીમાન્નારાયણઃ સ્વામી જગતાં પ્રભુરીશ્વરઃ ।
મત્સ્યઃ કૂર્મો વરાહશ્ચ નારસિંહોઽથ વામનઃ ॥ ૧૫૯॥

રામો રામશ્ચ કૃષ્ણશ્ચ બૌદ્ધઃ કલ્કી પરાત્પરઃ ।
અયોધ્યેશો નૃપશ્રેષ્ઠઃ કુશબાલઃ પરન્તપઃ ॥ ૧૬૦॥

લવબાલઃ કઞ્જનેત્રઃ કઞ્જાઙ્ઘ્રિઃ પઙ્કજાનનઃ ।
સીતાકાન્તઃ સૌમ્યરૂપઃ શિશુજીવનતત્પરઃ ॥ ૧૬૧॥

સેતુકૃચ્ચિત્રકૂટસ્થઃ શબરીસંસ્તુતઃ પ્રભુઃ ।
યોગિધ્યેયઃ શિવધ્યેયઃ શાસ્તા રાવણદર્પહા ॥ ૧૬૨॥

શ્રીશઃ શરણ્યો ભૂતાનાં સંશ્રિતાભીષ્ટદાયકઃ ।
અનન્તઃ શ્રીપતી રામો ગુણભૃન્નિર્ગુણો મહાન્ ॥ ૧૬૩॥ 1000

એવમાદીનિ નામાનિ હ્યસઙ્ખ્યાન્યપરાણિ ચ ।
એકૈકં નામ રામસ્ય સર્વપાપપ્રણાશનમ્ ॥ ૧૬૪॥

સહસ્રનામફલદં સર્વૈશ્વર્યપ્રદાયકમ્ ।
સર્વસિદ્ધિકરં પુણ્યં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૧૬૫॥

મન્ત્રાત્મકમિદં સર્વં વ્યાખ્યાતં સર્વમઙ્ગલમ્ ।
ઉક્તાનિ તવ પુત્રેણ વિઘ્નરાજેન ધીમતા ॥ ૧૬૬॥

સનત્કુમારાય પુરા તાન્યુક્તાનિ મયા તવ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સ તુ બ્રહ્મપદં લભેત્ ॥ ૧૬૭॥

તાવદેવ બલં તેષાં મહાપાતકદન્તિનામ્ ।
યાવન્ન શ્રૂયતે રામનામપઞ્ચાનનધ્વનિઃ ॥ ૧૬૮॥

બ્રહ્મઘ્નશ્ચ સુરાપશ્ચ સ્તેયી ચ ગુરુતલ્પગઃ ।
શરણાગતઘાતી ચ મિત્રવિશ્વાસઘાતકઃ ॥ ૧૬૯॥

માતૃહા પિતૃહા ચૈવ ભ્રૂણહા વીરહા તથા ।
કોટિકોટિસહસ્રાણિ હ્યુપપાપાનિ યાન્યપિ ॥ ૧૭૦॥

સંવત્સરં ક્રમાજ્જપ્ત્વા પ્રત્યહં રામસન્નિધૌ ।
નિષ્કણ્ટકં સુખં ભુક્ત્વા તતો મોક્ષમવાપ્નુયાત્ ॥ ૧૭૧॥

શ્રીરામનામ્નાં પરમં સહસ્રકં પાપાપહં સૌખ્યવિવૃદ્ધિકારકમ્ ।
ભવાપહં ભક્તજનૈકપાલકં સ્ત્રીપુત્રપૌત્રપ્રદમૃદ્ધિદાયકમ્ ॥

ઇતિ શ્રીશતકોટિરામચરિતાન્તર્ગતે શ્રીમદાનન્દરામાયણે વાલ્મીકીયે
રાજ્યકાણ્ડે પૂર્વાર્ધે શ્રીરામસહસ્રનામકથનં નામ પ્રથમઃ સર્ગઃ ॥

Encoded and poofread by PSA Easwaran psaeaswaran at gmail
Verse numbers are as per the Ananda Ramayana and have not been reset to start with 1.

*shrIrAmasahasranAmam shrImadAnandarAmAyaNe*

pdf was typeset on January 30, 2021

Please send corrections to *sanskrit@cheerful.com*